श्री शिवपञ्चाक्षरस्तोत्रम्

Shri Shiv Panchakshara Stotram

Source: Wikimedia Commons — Brihat Stotra Ratnakara 1912, public-domain scan (item 42, scan page 115). Also compared: Internet Archive — Brihat Stotra Ratnakara 1912 source volume; Sri Sringeri Sharada Peetham — Shiva Panchakshara Stotram (comparison only).

मङ्गलाचरण

SHLOKA

श्रीगणेशाय नमः॥

śrīgaṇeśāya namaḥ||

पाँच अक्षर-श्लोक

SHLOKA 1

नागेंद्रहाराय त्रिलोचनाय भस्मांगरागाय महेश्वराय।
नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नमः शिवाय॥

nāgeṃdrahārāya trilocanāya bhasmāṃgarāgāya maheśvarāya|
nityāya śuddhāya digaṃbarāya tasmai nakārāya namaḥ śivāya||

SHLOKA 2

मंदाकिनीसलिलचंदनचर्चिताय नंदीश्वरप्रमथनाथमहेश्वराय।
मंदारपुष्पबहुपुष्पपूजिताय तस्मै मकाराय नमः शिवाय॥

maṃdākinīsalilacaṃdanacarcitāya naṃdīśvarapramathanāthamaheśvarāya|
maṃdārapuṣpabahupuṣpapūjitāya tasmai makārāya namaḥ śivāya||

SHLOKA 3

शिवाय गौरीवदनाब्जवृंदसूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकंठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय॥

śivāya gaurīvadanābjavṛṃdasūryāya dakṣādhvaranāśakāya|
śrīnīlakaṃṭhāya vṛṣadhvajāya tasmai śikārāya namaḥ śivāya||

SHLOKA 4

वसिष्ठकुंभोद्भवगौतमादिमुनींद्रदेवार्चितशेखराय।
चंद्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय॥

vasiṣṭhakuṃbhodbhavagautamādimunīṃdradevārcitaśekharāya|
caṃdrārkavaiśvānaralocanāya tasmai vakārāya namaḥ śivāya||

SHLOKA 5

यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगंबराय तस्मै यकाराय नमः शिवाय॥

yakṣasvarūpāya jaṭādharāya pinākahastāya sanātanāya|
divyāya devāya digaṃbarāya tasmai yakārāya namaḥ śivāya||

फलश्रुति और समापन

SHLOKA 6

पंचाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

paṃcākṣaramidaṃ puṇyaṃ yaḥ paṭhecchivasannidhau|
śivalokamavāpnoti śivena saha modate||

COLOPHON

इति श्रीमच्छंकराचार्यविरचितं शिवपंचाक्षरस्तोत्रं संपूर्णम्॥

iti śrīmacchaṃkarācāryaviracitaṃ śivapaṃcākṣarastotraṃ saṃpūrṇam||